# Shivapujana Vaidika Shodashopachara

# शिव पूजन वैदिक षोडशोपचार

## Document Information

Text title : shivavaidikaShoDachopachArapUjA

File name : shivavaidikaShoDachopachArapUjA.itx

Category : shiva, svara, veda, pUjA

Location : doc_shiva

Latest update : February 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2023

*sanskritdocuments.org*

# शिव पूजन वैदिक षोडशोपचार

१ ध्यानम् -

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः ।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥

२ आसनम् -

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि ॥

३ पाद्यम् -

यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिँसीः पुरुषं जगत् ॥

४ अर्घ्यम् -

शिवेन वचसा त्वा गिरिशाच्छावदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मँ सुमना असत् ॥

५ आचमनीयम् -

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीँश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ॥

६ स्नानम् -

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चेमाँ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाँ हेड ईमहे ॥

७ वस्त्रम् -
असौ यो॑ऽवसर्प॑ति नील॑ग्रीवो॒ विलो॑हितः ।
उ॒तैनं॑ गो॒पा अ॑दृश॒न्नदृ॑शन्नुदहा॒र्यः॑ ॥

८ यज्ञोपवीतम् -
नमो॑ अस्तु॒ नील॑ग्रीवाय सहस्रा॒क्षाय॑ मीढुषे॑ ॥

अथो॒ ये अ॑स्य॒ सत्वा॑नो॒ऽहं तेभ्यो॑ऽक॒रन् नमः॑ ।
९ गन्धम्-चन्दनम् -
प्रमु॑ञ्च॒ धन्व॑न॒स्त्व-मु॒भयो॒रार्त्नि॑यो॒ज्र्याम् ॥

याश्च॑ ते॒ हस्त॒ इष॑वः॒ परा॒ ता भ॑गवो वप ।
१० पुष्पम् -
विज्यं॒ धनुः॑ कप॒र्दिनो॒ विश॑ल्यो॒ बाण॑वाꣳ उ॒त ॥

अने॑शन्नस्येष॑व आ॒भुर॑स्य निष॒ङ्गथिः॑ ।
११ धूपम् -
या ते॑ हे॒तिर्मी॑ढुष्टम॒ हस्ते॑ ब॒भूव॑ ते॒ धनुः॑ ॥

तया॒ऽस्मान् वि॒श्वत॒स्त्वम॑य॒क्ष्मया॒ परि॑ब्भुज ।
१२ दीपम् -
परि॑ ते॒ धन्व॑नो हे॒तिर॒स्मान्वृ॑णक्तु वि॒श्वतः॑ ॥

अथो॒ य इ॑षु॒धिस्त॒वारे॑ अ॒स्मन्निधे॑हि॒ तम् ।
१३ नैवेद्यम् -
अ॒व॒त॒त्य॒ धनु॒स्त्वꣳ स॒हस्रा॑क्ष॒ शते॑षुधे ॥

नि॒शीर्य॑ श॒ल्याना॒ं मुखा॑ शि॒वो नः॑ सु॒मना॑ भव ।
१४ ताम्बूलम् -
नम॑स्ते अ॒स्त्वायु॑धाया॒नात॑ताय धृ॒ष्णवे॑ ॥

उ॒भाभ्या॑मु॒त ते॒ नमो॑ बा॒हुभ्या॒म् त॒व धन्व॑ने ।
१५ प्रदक्षिणाम् -
मा नो॑ म॒हान्त॑मु॒त मा नो॑ अर्भ॒कं
मा न॒ उक्ष॑न्त-मुत मा न॑ उक्षि॒तम् ।
मा नो॑ऽवधीः पि॒तर॒ं मोत मा॒तर॑ं प्रि॒या मा

नस्तनुवो रुद्र रीरिषः ॥ १०-५॥

१६ मन्त्र पुष्पाञ्जलीम् -
मानस्तोके तनये मा न आयुषि मा नो गोषु
मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितोऽवधी-र्हविष्मन्तो
नमसा विधेम ते ॥ १०-६॥

*Shivapujana Vaidika Shodashopachara*

pdf was typeset on February 5, 2023

Please send corrections to *sanskrit@cheerful.com*